Barcode : 2990100028166
Title - Gopura Sandesha
Author - Srinivasacharyulu,Bommakanti
Language - sanskrit
Pages - 57
Publication Year - 1995
Barcode EAN.UCC-13
2 990100 028166

# गोपुरसन्देशः

(अन्य खण्डकृतयश्च)

कविः

बोम्मकण्टि श्रीनिवासाचार्यः

कल्याणी प्रचुरणलु
१-९-३४/५/१ राम्नगर्
हैदराबाद् - 500 048.

'Gopura Sandesah'
a collection of fourteen sanskrit lyrics by
*Bommakanti Srinivasacharyulu*

*First edition :* 1000 Copies

*Copyright :* Poet, 1995

*Cover Design :* Harisankar

*Price :* Rs. 30/-

---

*This book is printed with the financial assistance of Sri Tirumala Tirupati Devasthanams under their scheme 'Aid to publish religious books'.*

---

*Type set by :* Fontline Graphics,
Hyderabad - 44
Phone : 660000

*Printed by :* **Kala Jyothi Process Ltd.,**
1-1-60/5, R.T.C. Cross Roads,
Musheerabad, Hyderabad - 500 020. A.P.

## ACKNOWLEDGEMENTS

I can not adequately thank the four distingnished savants who readily agreed to introduce this slim book of my Sanskrit lyrics to the lovers of sanskrit poetry.

This collection, in fact, ought to have appeared about two decades ago when prof. V. Raghavan, former professor and Head, Sanskrit Department, University of Madras, and a renowned poet and researcher, to whose memory the volume is dedicated, was alive. Even the dedicatory verses were composed then and were read to him. Unfortunately the publication has been delayed due to circumstances beyond my control.

My thanks are due to Tirumala Tirupati Devasthanams, Tirupati, but for whose financial assistance the volume would not have seen the light of day.

I am also thankful to Mr. Harisankar, Proprietor, Fontline Graphics, not only for his neat execution of typesetting the book, but also for giving a suitable cover design.

I should also thank the printers and several other friends who contributed enormously in producing this book in its present form :

सर्वेषां सरसात्मनां
वितनुता मेषा मनीषारतिम्



*20-4-1995*
*1-9-34/5/1,*
*Ramnagar,*
*Hyderabad - 48*

**Bommakanti**
**Srinivasacharyulu**

# काव्यानुक्रमसूचिका

पत्रसंख्


1. गोपुर सन्देशः ........................................ १४
2. वसन्ततिलकम् ........................................ २०
3. सत्यसायी गीता ........................................ २४
4. कालिदास प्रतिभा ........................................ ३०
5. मुकुलगीता ........................................ ३२
6. हे विश्वकवे! ........................................ ३४
7. आर्याभिनन्दनम् ........................................ ३६
8. जयदेव प्रशंसा ........................................ ३९
9. हे भारति! ........................................ ४१
10. हंर्षो हर्षविवर्धनः ........................................ ४३
11. देशचरितानि ........................................ ४४
12. जयगीता ........................................ ५१
13. कृष्णोऽहम ........................................ ५४
14. विद्वदभिनन्दनम् ........................................ ५५

# सत्यसायी गीता

(सत्यसायीति नाम्ना प्रथितयशसां महात्मनां प्रबोधान् आधारीकृ रचितेयं 'सत्यसायी गीता)

१

कृतं यद्यत् त्वया नित्यम् - आनुभूतं च यत्त्वया।
तत्तत् संस्कार रुपेण - लग्नं भवति चेतसि॥

२

संस्काराणां समाहारो - नूनं मानव जीवितम्।
द्विविधास्ते च संस्काराः - सदसद्रूपभेदतः॥

३

अस्फुटा विस्मृता स्तेषु - सैकते हि लिपि र्यथा।
सुखदुःखप्रदा एव - दृढाः नित्यं स्मृता स्त्वया॥

४

अनेके बाल्यसंस्कारा - अपि ते यदि विस्मृताः।
जन्मान्तरोपलब्धानां - संस्काराणां कुतः स्मृतिः॥

५

संस्काराणा मनन्तत्वे - ऽप्यस्मिन् मानव जीविते।
सुदृढाः पञ्चषा एव - परिशिष्टा स्सयुरन्ततः॥

६

भवेज्जीवित वाणिज्ये - लाभ स्संस्कार एव हि।
दृढतमस्तु संस्कारः - स्मृतः स्यादन्तिमक्षणे॥

७

भक्ष्यान्येव स्मरत्येको - यद्यसौ भोजनप्रियः।
पुत्रान् पौत्रान् स्मरत्यन्या - यदि सा पुत्रवत्सला॥

८

अन्त्यकाले स्मृतो योऽसौ - संस्कारो बलवत्तमः।
भवेन्मूलधनं नूनं - [illegible]जन्मनः॥

९

स्मर्तव्यो यो हि संस्कारो - जीवितस्यान्तिमक्षणे।
तदार्जनोन्मुखी मेनां - कुरु जीवनवाहिनीम्॥

१०

अन्त्यक्षणं सदा स्मृत्वा - श्वः प्रभृत्येव जीवितम्।
नय त्वं धर्ममार्गस्थः - सत्यसौन्दर्य शोभितम्॥

११

भव त्वं साधुसंसेवी - पापदूरो गतव्यथः।
निर्ममो निरहङ्कारो - नित्य मन्योपकारकृत्॥

१२

सत्संस्कारोन्मुखं भूयात् - सत्ववत् साधु ते मनः।
दोष मात्मगतं ज्ञात्वा - सद्यस्तं परिवर्जयेत्॥

१३

स्वं दोषं यदि जानाति - तत्तस्य जननान्तरम्।
प्रबोधे वास्तवे भूते - नूत्नं बाल्यं भवेत्तदा॥

१४

सदा सन्निहितो मृत्युः - न मन्तव्येऽशुभस्तु सः।
अनुक्षणं नरो याति - मृत्यून्मुखस्तु तत्त्वतः॥

१५

जीवितधूमयानोऽसौ - मृत्युमेव नयेन्नरम्।
अध्रुवाहीतरे सर्वे - मृत्युरेको ध्रुवो भुवि॥

१६

त्यजेदिन्द्रिय चापल्यं - लगेच्च संयमे मनः।
सत्त्वोन्मुखं मनः कुर्यात् - सत्संस्कार परायणः॥

१७

जीविताख्य शिलायास्तु - शाणः स्याद्रूपकल्पने।
प्रत्येकं कर्म ते तस्मात् - सत्कर्मप्रवणो भव॥

१८

प्रवाहे मज्जमानस्य - दार्वेकं तारकं यथा।
भवाब्धिमग्न जीवानां - पुण्यमेकं हि तारकम्॥

१९

व्यर्थं न स्यात् कृतं पुण्यं - कृतं पापं तथैव च।
निवृत्तः पापकर्मेभ्यः - तस्मात्त्वं षुण्य मार्जय॥

२०

सदेव पश्य नेत्राभ्यां - श्रवोभ्यां सद्वचः श्रृणु।
सद्वाक्यं वद नित्यं त्वं - भवेर्जेता न संशयः॥

२१

नियोजय करौ नित्यं - पवित्रेष्वेव कर्मसु।
ईश्वरं संस्मर स्वान्ते - बाह्ये भूयाः स्वधर्षकृत्॥

२२

संस्काराणां प्रवाहो हि - भूयादेकमुखः सदा।
पर्वताग्रे पतद्वारि - सर्वं नद्यां यथा विशेत्॥

२३

एकोन्मुखं स्रवद्वारि - नदी भूत्वांबुधिं ब्रजेत्।
मध्ये नूनं विनश्येद् हि - भिन्नै र्मार्गैः स्रवज्जलम्॥

२४

संस्काराणां प्रवाहोऽसौ - पुष्टो भावैर्यदा शुभैः।
तदा मृत्यु र्भवेन्नूनं - आनन्दनिलयः शुभः॥

२५

न भिद्यते शिला या च - घातैर्विंशतिभिः कृतैः।
भिद्यते शिथिलीभूत्वा - ह्येकविंशेन सा शिला॥

२६

निरर्थका न ते घाताः - विंशतिस्तु पुराकृताः।
यतोऽन्त्यस्य तु साफल्ये - घातास्त एव हेतवः॥

२७

तथा सत्कर्मणैकेन - मनस्ते लय मेष्यति।
सत्कर्म निरतो भूत्वा - यदि त्वं जीवितं नयेः॥

२८

सत्कर्माणि कृतानीह - स्यु र्व्यर्थानि न जात्वपि।
मनोलय महा सिद्ध्यै - उपकुर्वन्ति तान्यपि॥

२९

ईश्वर स्स हि सर्वेषां - संरक्षक इति स्मरन्।
सत्कर्म निरतो भूयाः - निक्षिप्य भारमीश्वरे॥

३०

सुतमुपेक्षते माता - सञ्चरन्त मितस्ततः।
धैर्यशिक्षामतिः किंतु - पतन्तं तं समुद्धरेत्॥

३१

ईश्वरोऽपि तथैवैनं - जीवात्मानं हि रक्षति।
जीवात्माख्य पटस्यास्य - तन्तुर्हस्ते जगत्पतेः॥

३२

सत्संस्कारै र्दृढं कुर्याः - तन्तुमेनं विमुक्तिदम्।
गम्यं नयति संस्कारो - जीविनं नात्र संशयः॥

३३

सत्कार्याचरणादेव - गम्यं याति नरोऽन्ततः।
ईश्वरस्मरणं नित्यं - मुक्ति मार्गे नयेन्नरम्॥